**पद्मकिन्** पु॰ पद्मकं बिन्दुजालमस्त्यस्य त्वचि इनि। १भूर्ज्जवृक्षे शब्दमा॰। २हस्तिनि [२०५८पृ॰ दृश्यम्।

**पद्मकीट** पु॰ पद्ममिव कीटः। कीटभेदे सुश्रुतः कीटशब्दे

**पद्मकेतन** पु॰१गरुडात्मजभेदे भा॰उ॰१००अ॰। ६त॰। २पद्मनिवासे न॰

**पद्मकेशर** पु॰न॰ ६त॰। किञ्जल्के राजनि॰।

**पद्मगन्ध(न्धि)** त्रि॰पद्मस्येव गन्धोऽस्य वा इत् समा॰। १पद्मतुल्यगन्धयुक्ते। इदन्तः। २पद्मकाष्ठे न॰ भावप्र॰।

**पद्मगर्भ** पु॰ पद्मं विष्णुनाभिकमलं गर्भ इव उत्पत्तिस्थानमस्य। चतुरानने ब्रह्मणि शब्दर॰ तस्य तथोत्पत्तिर्यथा “पराशेषां भूतानामात्मा यः पुरुषः परः। स एवासीदिदं विश्वं कल्पान्तेऽन्यन्न किञ्चन। तस्य नाभेः समभवत् पद्मकोशो हिरण्मयः। तस्मिन्जज्ञे महाराज! स्वयम्भूश्चतुराननः” भाग॰८।१।२। पद्मस्य हृदयपुण्डरीकस्य गर्भोमध्य उपासनास्थानतयाऽस्य। २परमेश्वरे “पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत्” विष्णुस॰। ६त॰। ३कमलमध्ये च। [भा॰आ॰ ६६अ॰। २शङ्खे च

**पद्मगुणा** स्त्री पद्मं गुणयति आसनत्वेन गुण—क। १लक्ष्म्यां

**पद्मचारिणी** स्त्री पद्ममिव चरति चर—णिनि। उत्तरापथप्रसिद्धे स्वनामख्याते लताभेदे अमरः।

**पद्मज** पु॰ पद्मात् विष्णुनाभिकमलात् जायते जन—ड। ब्रह्मणि चतुर्मुखे पद्मगर्भशब्दे दृश्यम्। पद्मजातादयोऽप्यत्र।

**पद्मतन्तु** पु॰ ६त॰। मृणाले राजनि॰।

**पद्मदर्शन** त्रि॰ पद्मस्येव दर्शनमस्य। १पद्मतुल्यदर्शने (नोवा) इति ख्याते २वृक्षे पु॰ शब्दच॰।

**पद्मनाभ** पु॰ पद्मं नाभौ यस्य संज्ञायाम् अच् स॰। १विष्णौ। “पद्मनाभोऽरविन्दाक्षः” विष्णुसं॰ भाष्ये तु पद्मस्य नाभौ स्थित इत्येवं उक्तम्। तत्र अर्श आद्यच् इति भेदः। २धृतराष्ट्रपुत्रभेदे भा॰ आ॰ ६७अ॰। ३नागभेदे पु॰ शा॰३५७अ॰। [समा॰। विष्णौ द्विरूपकोषः।

**पद्मनाभि** पु॰ संज्ञात्वेऽपि समासान्तविधेरनित्यत्वात् न अच्

**पद्मनाल** न॰स्त्री ६त॰। मृणाले [पु॰ हेम॰।

**पद्मनेत्र** त्रि॰पद्ममिव नेत्रमस्य। १पद्मतुल्यनेत्रयुक्ते २बुद्धभेदे

**पद्मपत्र** न॰ पद्मस्य पत्रमिव। १पुष्करमूले अमरः ६त॰। २कमलदले च पद्मपर्णादयोऽप्यत्र न॰।

**पद्मपाणि** पु॰ पद्मं पाणौ यस्य। ब्रह्मणि १चतुर्मुखे २बुद्धे त्रिका॰। ३कमलहस्तके त्रि॰।

**पद्मपुराण** न॰ व्यासप्रणीते महापुराणभेदे तत्प्रतिपाद्यादि नारदीयपु॰ उक्तं यथा

प्रथमे सृष्टिखण्डे “पुलस्त्येन तु भीष्माय सृष्ट्यादिक्रमतो द्विज!। नानाख्यानेतिहासाद्यैर्यत्रोक्तो धर्मविस्तरः। पुष्करस्य च माहात्म्यं विस्तरेण प्रकीर्त्तितम्। ब्रह्मयज्ञविधानञ्च वेदपाठादिलक्षणम्। दानानां कीर्त्तनं यत्र व्रतानाञ्च पृथक् पृथक्। विवाहः शैलजायाश्च तारकाख्यानकं महत्। माहात्म्यञ्च गवादीनां कीर्त्तितं सर्वपुण्यदम्। कालकेयादिदैत्यानां बधो यत्र पृथक् पृथक्। ग्रहाणामर्च्चनं दानं यत्र प्रोक्तं द्विजोत्तम!। तत् सृष्टिखण्डमुद्दिष्टं व्यासेन सुमहात्मना” द्वितीये भूमिखण्डे “पितृमात्रादिपूज्यत्वे शिवशर्मकथा पुरः। सुव्रतस्य कथा पश्चात् वृत्रस्य च बधस्तथा। पृथोर्वेणस्य चाख्यानं धर्माख्यानं ततः परम्। पितृशुश्रूषणाख्यानं नहुषस्य कथा ततः। ययाति-चरितञ्चैव गुरुतीर्थनिरूपणम्। राज्ञा जैमिनिसंवादो बह्वाश्चर्य्यकथायुतः। कथा ह्यशोकसुन्दर्य्या हुण्डदैत्यबधाश्रिता। कामोदाख्यानकं तत्र विहुण्डबधसंयुतम्। कुञ्जलस्य च संवादश्च्यवनेन महात्मना। सिद्धाख्यानं ततः प्रोक्तं खण्डस्यास्य फलोहनम्। सूतशौनकसंवादं भूमिखण्डमिदं स्मृतम्”। तृतीये स्वर्गखण्डे “ब्रह्माण्डोत्पत्तिरुदिता यत्रर्षिभ्यश्च सौतिना। सभूमिलोकसंस्थानं तीर्थाख्यानं ततः परम्। नर्मदोत्पत्तिकथनं तत्तीर्थानां कथा पृथक्। कुरुक्षेत्रादितीर्थानां कथाः पुण्याः प्रकीर्त्तिताः। कालिन्दीपुण्यकथनं काशीमाहात्म्यवर्णनम्। गयायाश्चैव माहात्म्यं प्रयागस्य च पुण्यकम्। वर्णाश्रमानुरोधेन कर्मयोगनिरूपणम्। व्यासजैमिनिसंवादः पुण्यकर्मकथाश्रितः। समुद्रमथनाख्यानं व्रताख्यानं ततः परम्। ऊर्ज्जं पञ्चाह माहात्म्यं स्तोत्रं सर्वापराधनुत्। एतत् स्वर्गाभिधं विप्र! सर्वपातकनाशनम्”। चतुर्थे पातालखण्डे “रामाश्वमेधे प्रथमं रामराज्याभिषेचनम्। अगस्त्याद्यागमश्चैव पौलस्त्यान्वयकीर्त्तनम्। अश्वमेधोपदेशश्च हयचर्य्या ततःपरम्। नाना राजकथाः पुण्या जगन्नाथानुवर्णनम्। वृन्दावनस्य माहात्म्यं सर्वपापप्रणाशनम्। नित्यलीलानुकथनं यत्र कृष्णावतारिणः। माधवस्नानमाहात्म्ये स्नानदानार्च्चने फलम्। धरावराहसंवादो यमब्राह्मणयोः कथा। संवादो राज-